(1) In *Viśiṣṭādvaita-grantha-ratna-mālā*, Vol. I, Madras 1907–8.

(2) *Āḷavandāra-stotra*, edited with Hindi exposition, styled Pradīpikā by Bhāgavatācārya of Brindaban, Bombay 1910.

आलमंदारुव्याख्या Ālamandāruvyākhyā

No. 160 — 254 / 1892–95

Size.— 10¼ in. by 4⅝ in.

Extent.— 33 leaves ; 9 lines to a page ; 32 letters to a line.

Description.— Country paper ; Devanāgarī Characters ; handwriting clear, uniform and legible ; yellow pigment used for making corrections ; foll. 29–33 are ruled with two double horizontal red lines ; the text, containing 68 verses is written in the centre of each fol. with the commentary above and below it.

Age.— Fairly old.

Begins.— fol. 1^{b} Comm.—

॥ श्रीमते रामानुजाय नमः ॥

श्रीमत्समस्तकल्याणगुणात्मकः सर्वेश्वरः स्वाज्ञारूपवेदमार्गमतीत्यापथे प्रवृत्त-
चेतनान् वीक्ष्य दयमानमनास्तदंगीकारार्थमिह लोके यामुनाचार्यरूपेणावतीर्य
महाकुलप्रसूतसत्संप्रदायनिरतं श्रीराममिश्रमाश्रित्य वेदवेदांगोपांगशब्दतर्को-
भयमीमांसादिसकलशास्त्राण्यधीत्य दिगंतविश्रांतमहाप्राज्ञो भूत्वा समस्तदुष्टक-
दर्थीकृत्य पंडितपामरविभागरहितं सर्वैर्जनैरपि वंद्यमानमहादेशिको भूत्वा..

. . . (fol. 2ᵃ) स्तोत्रं परिसमाप्यानंदनिर्भरो यमुन प्राप्यस्य ब्रह्मणो स्वं प्राप्तुश्च प्रत्यगात्मनः प्राप्त्युपायः फलं . . . . etc.

Text.—

॥ श्री ॥

स्वादयन्निहसर्वेषां त्रय्यं तार्थं मुहुर्मुहुः ।
स्तोत्रयामासयोगींद्रस्तं वंदे यामुनाह्वयं ॥ १ ॥

fol. 2ᵇ

नमो नमो यामुनाय यामुनाय नमो नमः ।
... ... ॥ २ ॥ etc.

Ends.— fol. 33ᵃ Text.—

यत्पादांभोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोहं यामुनेयं नमामि तं ॥ ६८ ॥

Comm.—

इदानीं यामुनमुनिं नमस्करोति यत्पादेति यत्पादांबुरुहध्यानविध्वस्ताशेष· कल्मषः । यस्य यामुनाचार्यस्य पादांबुरुहयोः पादकमलयोः ध्यानेन विध्व- स्तानि विनाशितानि अशेषाणि समस्तानि कल्मषाणि पापानि यस्य स तथोक्तः वस्तुतामुपदेयतामुपयातः प्राप्तोहं यामुनेयं यामुनाचार्यं नमामि वंदे ॥ ६८ ॥

इति आलमंदारुमूलव्याख्यानं संपूर्णं ॥

लक्ष्मीनाथाख्यसिंधो शठरिपुजलदः प्राप्य कारुण्यनीरं
नाथाद्रावभ्यर्षिचित्तद्गुरुघुवरांभोजचक्षु...राभ्यां
गत्वा तं यामुनाख्यं सरिनमथयतींद्राख्यपद्माकरेंद्रं
संपूर्यं प्राणिसस्ये प्रवहति बहुधा देशिकेंद्रभ्रमौघैः ॥

आविर्भावतिरोभाव — Āvirbhāvatirobhāva

No. 161 — 227/1884-86

Size.— 10 in. by 4½ in.

Extent.— 10 leaves ; 10 lines to a page ; 33 letters to a line.

Description.— Country paper, grey and musty; Devanāgarī characters; handwriting fairly bold and clear; the ink is very light and brownish; red chalk used for marking special words; yellow pigment used frequently for making corrections; borders ruled with double lines in the same ink used for writing; some recent corrections (marginal as well as in the text itself) appear on almost all foll.

Age.— Fairly old.

Author.—Puruṣottama, son of Pītāmbara.

Begins.— fol. 1^b

॥ श्रीकृष्णाय नमः ॥

यदाविर्भाव आनंद आविर्भवति सर्वतः ॥
तिरोभवंति संतापास्तं श्रये गोकुलेश्वरं ॥ १ ॥

नन्विदमनुपपन्नं कार्योत्पत्तिनाशावनुपगच्छतां कार्याविर्भावतिरोभावयोरपि दुर्निरूपत्वात् । तयोरननुभवयोग्यतातद्योग्यतात्मकत्वेन वर्त्तमानवस्तुधर्मत्वात् । उत्पत्तिमंतरेण कार्यवर्त्तमानतायाश्चाशक्यवचनत्वात् ॥ १ ॥ etc.

Ends.— fol. 10^a

तृतीयस्याब्रह्मविवर्त्तभूतायाः प्राकृतत्वेन विकारित्वात्प्रथमसमयसंसर्गाभावविकार उत्पत्तिः ॥ चरमसमयसंसर्गाभावविकारो नाशः ॥ अस्त्यादयोपि तथा । तादृशैव तत्रेच्छेति ॥ चतुर्थ्यो ख्यातिरूपाः सर्वं इति न काचिदनुपपत्तिः ॥

इति श्रीवल्लभाचार्यवाणीसूचितया दिशा ।
आविर्भावतिरोभाव प्रपंचोयं विचारितः ॥ ॥

श्रीवल्लभाचार्यचरणपरागप्रभावाधिगतसर्वसिद्धेः पीतांबरसुतस्य पुरुषोत्तमस्य कृतावाविर्भावतिरोभाववादः पद्यः संपूर्णः ॥ ॥ श्रीरस्तु ॥
॥ श्री ॥

References.— (1) Mss.— A- Aufrecht's Catalogus Catalogorum.— I, 54^b.

उत्तरगीता Uttaragītā

No. 162 $\frac{162}{1879\text{–}80}$

Size.— $6\frac{1}{4}$ in. by $5\frac{1}{8}$ in.

Extent.— 16 leaves; 12 lines to a page; 25 letters to a line.

Description.—Country paper, thin, crisp and grey; Devanāgarī characters; handwriting medium small, beautiful and uniform; borders ruled with two spaced series of three and two red lines; speakers indicated in red as also verse-endings and colophons. Ms. contains 6 chapters as follows: I 39; II 30; III 42; IV 37; V 37; VI 56; white pigment occasionally used for corrections; leaves are double, and pagination only on even foll.

Age.— Saṁvat 1865.

Begins.— fol. 1^b.

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

उँ अस्य गीतासारस्तोत्रमंत्रस्य उँकारस्य ब्रह्माविष्णुमहेश्वरईश्वरसदाशिव ऋषिः ॥ गायत्री त्रिष्टुप् अनुष्टुप् छंदांसि ॥ अग्निर्वायुः सूर्यो देवता ॥ ऋग्यजुःसामतत्त्वं ॥ आहवनीगार्हपत्यदक्षणाग्निस्थानानि ॥ भूर्भुवक्षेत्रं ॥ अकारो बीजं उकारः शक्तिः ॥ मकारः कीलकं ॥ उँमित्येकाक्षरं ब्रह्म मोक्षार्थे जपे विनियोगः ॥

अर्जुन उवाच ॥

उँकारस्य महात्म्यं रूपं स्थानं परं तथा ॥
तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ॥ १ ॥

श्रीभगवानुवाच ॥

साधु साधु महाभावो यन्मां त्वं परिपृच्छसि ॥
विस्तरेण प्रवक्ष्यामि तन्मे निगदितं शृणु ॥ २ ॥ etc.

Ends.—fol. 16ª.

> हृदयकमलमध्ये दीपकद्वेदसारं ।
> प्रणवमयमतर्क्यं योगिभिध्यांनगम्यं ॥
> हरिगुरुशिवयोगं सर्वभूतस्थमात्मा ।
> सकृदपि मनसापि ध्यायते यः स मुक्तः ॥ ५६ ॥

इति श्रीमहाभारते भीष्मपर्वणि उत्तरगीतायां योगशास्त्रे ब्रह्मविद्यायां श्रीकृष्णार्जुनसंवादे षष्ठोध्यायः ॥ ६ ॥

संवत् । १८६५ । आषाढ शुद्ध । १३ । भौमवासरे इदं पुस्तकं गुसांईंजी श्रीतुलागिरजीकस्य किंकरगोपालगिरजी पठनार्थं गीरपुरमध्ये महंकाल-संनिधौ लिषावितु ॥ हस्ताक्षर कद्रुभटदसोरा उपाध्यानावलीका ग्रगणे राम-पुरा ॥ श्रीरस्तु कल्याणमस्तु ॥

उत्तरगीता — Uttaragītā

No. 163 : $\frac{174}{1883\text{–}84}$

Size.— 9 in. by 5⅛ in.

Extent.— 13 leaves ; 9 lines to a page ; 22 letters to a line.

Description.— Country paper, rough and greyish ; Devanāgarī characters ; handwriting medium, beautiful and clear ; borders ruled with double red lines ; verse-endings and colophons in red ink ; occasional marginal corrections and additions ; leaves discoloured in many places ; Ms. divided into three chapters :— I 54 ; II 56 ; III 27 ; speaker's names in red ink ; a very carelessly written Ms.

Age.— Fairly old.

Begins.— fol. 1ᵇ.

> श्रीगणेशाय नमः ॥ श्रीसरस्वतियं नमः ॥
> श्रीगुरुभ्यो नमः ॥ ॐ नमो भगवते वासुदेवाय ॥

अर्जुन उवाच ॥

परं परस्मात्प्रकृते नरादीः ॥ मेकं निविष्टं बहुदा गुहायां ॥
सर्वालयं सर्वजगंन्निवासं ॥ तमेव विष्णुशरणं प्रपद्ये ॥ १ ॥

यदेकं निष्कलं ब्रह्म व्योमातीतं निरंजनं ॥
निर्गुणं परमं दिव्यमप्रमेयमनुत्तमं ॥ २ ॥

अप्रतर्क्यमविज्ञेयं . . . etc. वर्जितं ॥
कैवल्यं केवलं शांतं शुद्धमत्यंतनिर्मलं ॥ ३ ॥

कारणं योगनिर्मुक्तं हेतुसाधनवर्जितं ॥
प्रणवाग्रे स्थितं सुक्ष्मं ज्ञानज्ञेयस्वरूपिणं ॥ ४ ॥ etc.

Ends.— fol. 12^b^.

ब्रह्मभेद् न जानाती तस्य मुक्तिर्न जायते ॥
सूत्रतंतुनिभंदेवं सर्वभुतन्यवस्थितं ॥ २६ ॥

fol. 13^a^.

उर्णतंतुनिभाकारं ब्रह्मसूत्रनिभाकृती ॥
सुचितं निर्मलं शांतं निश्चितं विमलं भवेत् ॥ २७ ॥

इति श्रीमद्भागवते उत्तरगीतासुपनिषत्सू ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ॥ श्रीतियोध्यायः ॥ ३ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥
॥ श्रीराम ॥

उत्तरगीता Uttaragītā

No. 164 $\frac{200}{1887\text{–}91}$

Size.— 7¾ in. by 4⅞ in.

Extent.— 16 leaves ; 9 lines to a page ; 22 letters to a line.

Description.— Country paper crisp, rough and greyish ; Devanāgarī characters ; handwriting medium, fair and legible; borders

ruled with double red lines ; white pigment used for making corrections ; pagination independent as follows :— foll. 1–6, + 1–6, + 1–4 = 16 ; Ms. divided into 3 chapters : I 65 (foll. 1–6) ; II 59 (foll. 1 to 6) ; III 36 (foll. 1–4) ; thus independent pagination corresponds to chapter division ; verse-endings and speaker's names indicated in red ink.

Age.— Śaka 16 .8.

Begins.— Chapter I —fol. 1[a].

श्रीगणेशाय नमः ॥

अर्जुन उवाच

परं परस्मात्प्रकृतेरनादिमेकं निविष्टं बहुधा गुहायां ॥
सर्वालयं सर्वजगन्निवासं तमेव विष्णुं शरणं प्रपद्ये ॥ १ ॥

यदेकं निष्कलं ब्रह्म... etc.

Chapter II— fol. 1[a] (= 7[a])

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

आरूढस्यारुरुक्षोश्च स्वरूपं परिकीर्तितं ॥
तत्रारूढस्य विषयं कथं स्यादिति पृच्छति ॥ १ ॥

अर्जुन उवाच ॥

ज्ञात्वा सर्वगतं ब्रह्म सर्वज्ञं परमेश्वरं ॥
अहं ब्रह्मेति निर्दिष्टं प्रमाणं तत्र किं भवेत् ॥ २ ॥ etc.

Chapter III— fol. 1[a] (= 13[a])

श्रीगणेशाय नमः ॥

अर्जुन उवाच ॥

योगीप्यर्थक्रियालापपरित्यागेन शांतधीः ॥
तृतीये शरणं यायाद्धरिमेवेति कीर्तयेत् ॥ १ ॥

श्रीभगवानुवाच ॥

अनंतशास्त्रं बहुवेदितव्यमल्पश्च कालो बहवश्च विघ्नाः ॥
यत्सारभूतं तदुपासितव्यं हंसो यथा क्षीरमिवांबुमिश्रं ॥ २ ॥ etc.

Ends.— Chapter I— fol. 6ᵇ

अत्यंतमलिनो देहो देही चात्यंतनिर्मलः ॥
उभयोरंतरं ज्ञात्वा कस्य शौचं विधीयते ॥ ६५ ॥

इति उत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अश्वमेधपर्वणि प्रथमोध्यायः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ छ ॥

अखंडसच्चिदानंदमवाङ्मनसगोचरं ॥
आत्मानमखिलाधारमाश्रयेभीष्टसिद्धये ॥ ॥

Chapter II— fol. 6ᵃ (=12ᵃ)

नाहं ब्रह्मेति जानाति तस्य मुक्तिर्न जायते ॥

श्रीभागवते

तेषामसौ क्लेशल एव शिष्यते ॥
नान्यद्यथास्थूलतुषावघातिनां ॥ ५९ ॥

इति श्रीउत्तरगीता-(fol. 6ᵇ)सूपनिषत्सु . . . . . . द्वितीयोध्यायः ॥ ॥ २ ॥ ॥ छ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Chapter III—fol. 4ᵃ (=16ᵃ)

समानं चिंतयेद्योगि यदि चिंत्यमपेक्षितं ॥
भूतवस्तुन्यशोचित्वे पुनर्जन्म न विद्यते ॥ ३५ ॥

आत्मयोगमवोच्चद्यो भक्तियोगो शिरोमणिं ॥
तं वंदे परमानंदं नंदनंदनमीश्वरं ॥ ३६ ॥

इति श्रीउत्तरगीतासूपनिषत्सु . . . . . अश्वमेधपर्वणि तृतीयोध्यायः ॥ श्रीकृष्णार्पणमस्तु ॥ शके १६९८ दुर्मुख नामत्सवछरे भाद्रपद वद्य ॥ ११ ॥ सोमवासरे । तद्दिने गितालेखन समाप्तं ॥

fol. 4ᵇ (=16ᵇ)

येकुण ग्रंथसंख्या प्रथम अध्याय श्लोक ६५ द्वितीयाध्याय श्लोक ५९ त्रितीयाध्याय श्लोक ३६ यकुण संख्या १६० ॥ ॥ छ ॥

उत्तरगीता | Uttaragītā
(सगौडपादीयव्याख्या) | (with Gauḍapādīyavyākhyā)

No.165 $\frac{255}{1892\text{-}95}$

Size.— 9¾ in. by 5¾ in.

Extent.— 26 leaves; 16 lines to a page; 25 letters to a line.

Description.— Country paper thin, crisp and grey; Devanāgarī characters; handwriting medium, fair and legible; borders ruled with two spaced double red lines; foll. 1ª and 26ᵇ have ink designs; text imbedded in commentary and coloured with red chalk; Ms. divided into 3 chapters:— I 58; II 48; III 18; The commentary is called गौडपादीय-दीपिका in the final colophon.

Age.— Fairly old.

Author.— Comm.— Gauḍapādācārya.

Begins.— fol. 1ᵇ —Text —

अर्जुन उवाच ॥

यदेकं निष्कलं ब्रह्म etc.

Comm.—

ॐ ज्ञानात्मने नमः ॥

सर्वेदमखिलद्वातं इमवाङ्मनसगोचरं ॥
भामामममखिलाधारमाश्रयेभिष्टसिद्धये ॥ १ ॥

॥ इह खलु भगवानर्जुनः भगवोन्मा(न)म्वरोवर्ण . . . etc.

Ends.—fol. 26ª— Text.—

पूणवस्तुन्वागोविन्दे पुनर्जन्म न विद्यते ॥ १७ ॥

आत्मबोधमबोधको मनिःयोग गिरोमणिः ॥

तं वंदे परमानंदं मंडलंदमनीश्वरं ॥ १८ ॥

Comm.—

इति श्रीउत्तरगीतायां गौडपादीयव्याख्यायां तृतीयोध्यायः ॥ ॥
॥ ६ ॥ इति श्रीमदुत्तरगीतायां गौडपादीयदीपिका समाप्ता ॥ छ ॥
॥ छ ॥ ॥ छ ॥

उत्तरगीता Uttaragītā
(सगौडपादव्याख्या) (With Gauḍapāda's Commentary)

No. 166 201 / 1887-91

Size.— 11¼ in. $5\frac{4}{16}$ in.

Extent.— 24 leaves; 11 lines to a page; 34 letters to a line.

Description.— Country paper, thin, crisp and grey; Devanāgarī characters; handwriting medium, legible, but not uniform; text in the centre, comm. above and below it; white pigment used for corrections; occasional marginal additions and corrections; Ms. divided into three chapters :— I 58 ; II 35 ; III 17.

Age.— Appears to be old.

Author.— Comm.: Gauḍapādācārya.

Begins.— fol. 1b : Text.—

अर्जुन उवाच ॥

यदेकं निष्कलं ब्रह्म व्योमातीतं निरंजनं ॥ etc.

Comm.—

श्रीकृष्ण जयराम कादी राजाय नमः ।

इह खलु भगवानर्जुनो धर्मक्षेत्रे कुरुक्षेत्रे . . . etc.

Ends.— fol. 24ª Text.—

समानं चिंतयेद्योगी यदि चिरयमपेक्षते ॥
भूतवस्तवनशोचित्वे पुनर्जन्म न विद्यते ॥ १७ ॥

इति श्रीमदुत्तरगीतायां तृतीयोऽध्यायः ३ समाप्तेयमुत्तरगीता श्रीकृष्ण-कृष्ण

Comm.

एतादृशो योगी यदि योगमनपेक्ष्यान्यद्विषयचिंतनं कुर्यात्तदपि केवलं योग-क्षेमार्थमित्याशयेनाह द्वाभ्यां १६, १७

इति गौडपादाचार्यविरचितायामुत्तरगीताव्याख्यायां तृतीयः ३ ॥

उत्तरगीता Uttaragītā

(सगौडपादीयव्याख्या) (With Gauḍapādīyavyākhyā)

No. 167 $\frac{17}{\text{A 1882-83}}$

Size.— 11 in. by 4⅜ in.

Extent.— 21 leaves; 10 lines to a page; 34 in text, 45 in Comm. letters to a line.

Description.— Country paper thick and rough; Devanāgarī characters; handwriting beautiful and uniform; borders ruled with two spaced series of double and single black lines; text in the middle, comm. above and below it; yellow pigment occasionally used for corrections; Ms. divided into three chapters —I 57; II 41; III 18; colophons to first and third chapters identical; colophon to chapter II— fol. 18ª— इति गौडपादाचार्ये उत्तरगीतायां कृष्णार्जुनसंवादे द्वितीयोऽध्यायः ॥ २ ॥

Age.— Fairly old.

Author.— Comm.—Gauḍapādācārya.

Begins.— fol. 1ᵇ Text.—

॥ श्रीरामकृष्णाभ्यां नमः ॥

अर्जुन उवाच ॥

यदेकं निष्कलं ब्रह्म व्योमातीतं निरंजनं ॥
अप्रतर्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितं ॥ १ ॥
कारणं योगनिर्मुक्तं हेतुसाधनवर्जितं ॥
हृदयांबुजमध्यस्थं ज्ञानज्ञेयस्वरूपकं ॥ २ ॥ etc.

Comm.—

॥ श्रीगणेशाय नमः ॥ राधावल्लभाय नमः ॥

इह खलु भगवानर्जुनः धर्मक्षेत्रे कुरुक्षेत्रे भगवदुपदिष्टं आत्मतत्वोपदेशं विषयभोगप्राबल्येन विस्मृत्य पुनस्तदेवात्मतत्वं भगवंतं पृच्छति हे केशव यज्ज्ञानाद्यस्य ब्रह्मणः सम्यक्ज्ञानात् क्षणादेव ज्ञानोत्तरक्षण एव मुच्येत अविद्यानिवृत्तिद्वारा. . . . etc.

Ends.— fol. 21ᵃ Text.—

भिक्षार्थं देहरक्षार्थं वस्त्रं शीतनिवारणं ॥
अश्मानं च हिरण्यं च शाकं शाल्योदनं तथा ॥ १७ ॥
समानं चिंतयेद्योगी यदि चिंत्यमपेक्षते ॥
भूतवस्तुन्यशोचित्वे पुनर्जन्म न विद्यते ॥ १८ ॥

इत्युत्तरगीतायां श्रीकृष्णार्जुनसंवादे तृतीयोऽध्यायः ॥ ३ ॥ समाप्तोयं गीताः ॥

Comm.—

अशोचित्वे गतमिति दुःखराहित्ये उपलक्षणमेतत् आगामि वस्तुनि निरपेक्षत्वे सिद्धे वर्त्तमानवस्तुनि लब्धे हर्षराहित्ये सिद्धे च पुनर्जन्म न विद्यत इति श्रीउत्तरगीतायां गौडपादीयव्याख्यायां तृतीयोऽध्यायः ३ टीका संपूर्णम् ॥

References.— (I) Mss.—A- Aufrecht's Catalogus Catalogorum :—
I 63ᵃ &ᵇ, 775ᵇ; II 190ᵇ; III 14ᵇ.

B-Descriptive Catalogues —

Ind. Off. Cat. II; i, No. 6525.
Mitra, *Notices*, i, No. 189.

(2) Printed Editions —

Published by T. K. Balasubrahmanyam, Srirangam, 1910.

उत्तरगीता Uttaragītā

(सगौडपादीयव्याख्या) (With Gauḍapāda's Commentary)

No. 168 $\frac{256}{1892\text{–}95}$

Size. 11½ in. by 5⅞ in.

Extent.— 19 leaves ; 10 lines to a page ; 44 letters to a line.

Description.— Country paper thick, rough and grey ; Devanāgarī characters ; handwriting medium, clear and uniform ; space in the centre left for text ; comm. written above and below this unwritten text ; yellow pigment used for corrections ; occasional marginal entries. ; Ms. divided thus :—I 57 ; II 47 ; III 18.

Author.— Gauḍapādācārya.

Begins.— fol. 1ᵇ

॥ श्रीगणेशाय नमः ॥

(अखंडसच्चिदानंदमवाङ्मनसगोचर ॥
आत्मानमखिलाधारमाश्रयेभीष्टसिद्धये ॥ १ ॥
[Added in a different hand]

इह खलु भगवानर्जुन etc.

Ends.— fol. 11ᵃ

इति श्रीउत्तरगीतायां श्रीकृष्णार्जुनसंवादे व्याख्ययागौडपादविरचितायां प्रथमोध्यायः ॥

fol. 17ᵃ :

इति श्रीउत्तरगीतासुपनिषत्सु ब्रह्मविद्यायां श्रीगौडपादाचार्यविरचितं उत्तरगीताटीकाख्यायां द्वितीयोध्यायः ॥

fol. 19ᵇ :

अगामिवस्तुनि निरपेक्षत्वे सिद्धे वर्तमानवस्तुनि लब्धे हर्षराहित्य सिद्धे च पुनर्जन्म न विद्यत इति ॥ १८ ॥

आत्मयोगमवोचद्यो भक्तियोगशिरोमणिं ॥
तं वंदे परमानंदं नंदनंदनमीश्वरं ॥ १९ ॥

इति श्रीउत्तरगीतासुपनिषत्सु गौडपादाचार्यविरचितायां उत्तरगीताव्याख्यायां तृतीयोध्यायः ॥ ३ ॥ ग्रंथसमाप्तं ॥ शुभं भवतु ॥

उत्तरगीता (सगौडपादीयव्याख्या) — Uttaragītā (With Gauḍapāda's Commentary)

No. 169 — $\frac{270}{1895\text{-}98}$

Size.— 8½ in. by 5 in.

Extent.— 12 leaves ; 20 lines to a page; 40 letters to a line.

Description — Country paper thick, rough and grey ; Devanāgarī characters ; handwriting small, minute at places, but legible ; the text is not fully given except in a few cases ; text citations coloured in red chalk ; occasional marginal corrections ; pagination runs from 1–10 + 1–2 = 12 foll. ; Ms. divided into 3 chapters :—I 57 ; II 47 ; III 19.

Age.— Fairly old.

Author.— Gauḍapādācārya.

Begins.— fol. 1^b :

श्रीगणेशाय नमः ॥

Comm.—

अखंड . . . . . . ॥

. . . . . भीष्टसिद्धये ॥ १ ॥

इह खलु अर्जुनः . . . etc.

Text.—

अर्जुन उवाच ॥

यदेकं निष्कलं ब्रह्म व्योमातीतं निरंजनं ॥ etc.

Ends.—fol. 12^b : Text.—

अरमयोगमवोच्चयो . . . . . ॥

. . . . . . नंदनंदनमीश्वरं ॥ १९ ॥

Comm.—

इति श्रीगौडपादविरचितायां उत्तरगीताव्याख्यायां तृतीयोध्यायः ॥ श्रीकृष्णार्पणमस्तु ॥

उपक्रमश्लोक (सटीक) — Upakramaśloka (with Commentary)

No. 170 — 302-B / 1899-1915

Size.— $11\frac{3}{8}$ in. by $4\frac{7}{8}$ in.

Extent.— 2 leaves ; 14 lines to a page; 50 letters to a line.

Description.— Country paper, grey, torn and worm-eaten ; Devanāgarī characters, handwriting clear and legible ; the verses are the introductory part of the 88th Chapter of the 10th *Skandha* of Bhāgavata.

Begins.—fol. 19^b :

श्रीगुरुर्जयति ॥

राजोवाच ।

देवासुरमनुष्येषु ये भजंत्यशिवं शिवं ।
प्रायस्ते धनिनो . . . . .
एतद्वेदितुमिच्छामः . . . .
. . . . . गजतां गतिः ॥ २ ॥ etc.

Comm.—

टीका— ॥ अष्टाशीतितमे विष्णुभक्तः कैवल्यमश्नुते ततोवांग्देवभक्तस्तु विभूतिमिति वर्ण्यते ॥

हरिर्भजतां मुक्तिद इत्युक्तं ॥ अभयं ध्यायेदजस्रं हरिमिति तत्र शंकते देवासुरेति etc.

Ends.— fol. 19^b Text.—

हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः ।
स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥ ५ ॥

श्रीभागवते दशमस्कंधेष्टाशीतितमेध्याये उपक्रमस्था एते श्लोकाः ।

fol. 20^a Comm.—

अशतोभूतिहेतुश्च तथानंदमयी स्वतः ॥
अशतस्तारतम्येन ब्रह्मरुद्रादिसेविनां ॥
विभूतयो भवंत्येवं शनैर्मोक्षोप्यवंशतः ॥
इदमेवाभिप्रेत्य तत्रतत्रोच्यते
श्रेयांसि तत्र खलु सात्वतनोर्नृणां स्युरिति ॥

तथासत्वं तत्तीर्थसाधनमिति । त्रयाणामेकभावानां योनुपश्यति वै भिदामिति । तथा न ते मय्युच्यते ये च भिदामण्वपि च क्षत इत्यादि ॥ एवं सति न किंचिदसमंजसं । तत्तभक्तानां कलहो मोहमात्रमिति ॥

उपदेशग्रंथ Upadeśagrantha

No 171 $\frac{752}{1891\text{–}95}$

Size — 9⅜ in by 4½ in

Extent — 2 + 2 leaves, 12 lines to a page 39 letters to a line

Description — Country paper dark, grey and musty Devanāgarī characters, handwriting fair, medium bold and uniform, borders ruled with three black lines each, red chalk used for marking colophons the two chapters are independently marked with pagination punctuation marks, the *Advaita khya prakaraṇa* is the third prakarana of the Gaudapāda-kārikas and the *Vaitathyākhya* the second prakarana of the same book

Age — Fairly old

Begins — fol 1a

ॐ उपासनाश्रितो धर्मो जाते ब्रह्मणि वर्त्तते ॥
प्रागुत्पत्तेरज सर्वं तेनासौ कृपण स्मृत ॥
अतो वक्ष्याम्यकार्पण्यमजातिसमतां यथा ॥
तथा न जायते किंचिन्जायमान समतत ॥ etc

Ends — fol 2b

स्वस्थं शांत सनिर्वाणमकथ्य सुखमुत्तम ॥
अजमजेन ज्ञेयेन स सर्वज्ञ परिक्ष्यते ॥
न कश्चिज्जायते जीव सभवोस्य न विद्यते ॥
एतत्तदुत्तम सत्य यत्र किंचिन्न जायते ॥

यत्र किंचिन्न जायत इति ॥

इति उपदेशग्रंथे अद्वैताख्य प्रकरण समाप्त ॥ ॥ १४ ॥

Begins — fol 1a

ॐ वैतथ्य सर्वभावानां स्वप्न आहुर्मनीषिण ॥
अंत·स्थानां तु भेदानां सवृतत्वेन हेतुना ॥ ॥

अदीर्घत्वाच्च कालस्य गत्वा देशान्न पश्यति ॥
प्रतिबुद्धश्च वै सर्वस्तस्मिन्देशे न विद्यते ॥ ॥
अभावश्च रथादीनां श्रूयते न्यायपूर्वकं ॥
स्वप्नजागरिते स्थाने ह्येकमाहुर्मनीषिणः ॥
भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना ॥ १ ॥ etc.

Ends.— fol. 2^b

न स्तुतिर्न नमस्कारो न स्वधाकार एव च ॥
चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् ॥
तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ॥
तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥ ७ ॥

इति द्वितीयं वैतथ्याख्यं प्रकरणमुपनिषदं समाप्तं ॥ ॥

References.—(1) *Mss.*— A- Aufrecht's Catalogus Catalogorum.— I, 67^a अद्वैतोपनिषत् : I 10^b ; II 2^b ; III 3^a ; उपदेशग्रंथ III 15^a.

उपदेशसाहस्री Upadeśasāhasrī

No. 172 560/1886-92

Size.— 9½ in. by 4⅜ in.

Extent.— 39 leaves ; 10 lines to a page ; 33 letters to a line.

Description.— Country paper smooth and greyish ; Devanāgarī characters ; handwriting medium, clear and uniform ; borders ruled with double black lines ; yellow pigment frequently used for making corrections ; red chalk used for sectional colophons ; occasional marginal additions and corrections.

Author.— Śaṅkarācārya.

Begins.— fol. 1^b.

॥ श्रीगणेशाय नमः ॥

ॐ चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयं ॥
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥ १ ॥ etc.

Ends.— fol. 39^a

विमथ्य वेदोदधितः समुद्धृतं सुरैर्महाब्धेस्तु यथा महात्मभिः ॥
तथामृतं ज्ञानमिदं हि यैः पुरा नमो गुरुभ्यः परमीक्षितं च यैः ॥२८॥

इति श्रीमत्परम . . . . . गोविंद . . . . . शिष्यस्य
श्रीशंकरभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसहस्री समाप्तम् ॥
॥ शुभं ॥ ॥

उपदेशसहस्री — Upadeśasahasrī

No. 173 — 258A / 1892-95

Size.— 9⅜ in. by 4⅜ in.

Extent —30 leaves; 13 lines to a page; 49 letters to a line

Description.— Country paper, rough and grey , Devanāgarī characters , handwriting small, clear and uniform , borders ruled with double black lines , occasional marginal additions or corrections , red chalk used for sectional colophons, and verse-numbers , forms part of Ms containing the गद्यबंध (from fol 21^a to end fol.)

Age— Appears to be very old.

Author.—Śamkarācārya

Begins.— fol. 1^b

॥ ॐ लक्ष्मीनृसिंहाय नम ॥ श्रीशंकराचार्याय नम. ॥
चैतन्य सर्वग सर्वं सर्वभूतगुहाशयम् ॥ etc.

Ends.— fol. 21ᵃ

तथामृतज्ञानमिदं हि यैः पुरा
नमो गुरुभ्यः परमीक्षितं च यैः ॥ ६५ ॥
इति ज्वरनाशप्रकरणं ॥ ॥

उपदेशसहस्री (गद्यबंध) — Upadeśasahasrī (Gadyabandha)

No. 174 — 258B / 1892-95

Size.— 9⅞ in. by 4⅜ in.

Extent.— 10 leaves; 13 lines to a page; 49 letters to a line.

Description.— Country paper, rough and grey; Devanāgarī Characters; handwriting small, clear and uniform; borders ruled with double black lines; occasional marginal additions and corrections; red chalk used for important words; forms part of Ms. containing 30 leaves of which foll. 1-21 are given to the पद्यबंध not complete, requiring but one fol. to complete the Ms. (See entry on fol. 1ᵃ : पत्र ३१).

Age.— Appears to be very old.

Begins.— fol. 21ᵃ.

अथ मोक्षज्ञानोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्दधानानामर्थिनामर्थाय etc.

Ends.— fol. 30ᵇ

कर्मणा नो कनीयान्स बाह्याभ्यंतरो ह्यजो न लिप्यते लोकदुःखो न बाह्य इत्यादि श्रुतिभ्यो नाम वस्तु न भासत्वादिति परमो हेतुरात्मनश्चाधपरोक्षत्वस्य ..... etc.

उपदेशसाहस्री Upadeśasāhasrı

No 175 115 C / 1902–07

Size — 7⅛ in by 3½ in

Extent — 44 leaves , 11 lines to a page 29 letters to a line

Description — Country paper, thin, rough and discoloured , Deva nāgarı Characters handwriting medium clear and uniform borders ruled with single black line verse numbers coloured with red chalk occasional marginal corrections and additions , Ms forms part of the गद्यबंध portion (begin ning at fol 44ª)

Age — Fairly old

Author —Śamkarācārya

Begins — fol 1ª

॥ श्रीगणेशाय नमः ॥

यत्राध्यस्तमिद् सर्वं मेयमात्रधविषया ॥
भाति नो भाति यज्ज्ञानांत्तदस्मि ब्रह्म चित्सुखं ॥ १ ॥

चैतन्य सर्वंग सर्वं सर्वंभूतगुहाशयं ॥
यत्सर्वंविषयातीत तस्मै सर्वविदे नम ॥ २ ॥

समापय्य क्रिया सर्वा दारान्याधानपूर्विका ॥
ब्रह्मविद्यामथेदानीं वक्तुं वेद प्रचक्रमे ॥ ३ ॥

कर्माणि देहे योगार्थं देहयोगे प्रियाप्रिये ॥
ध्रुवेस्यातां ततो रागो द्वषश्चैव तत क्रिया ॥ ४ ॥

धर्मोधर्मो ततोऽज्ञस्य देहयोगस्तथा पुन ॥
एव नित्यप्रवृत्तोय ससारश्चक्रवद्दृढ ॥ ५ ॥ etc

Ends —fol 44ª

विमथ्य वेदोदधिन समुद्धत
सुरैर्महाब्धेस्तु महात्मभिर्यथा ॥

तथामृतं ज्ञानमिदं हि यैः पुरा
नमो गुरुभ्यः परमीक्षितं च यैः ॥ ७१ ॥

इति ज्वरनाशप्रकरणं ॥ १९ ॥

उपदेशसाहस्री (गद्यबंध) — Upadeśasāhasrī (Gadyabandha)

No. 176 — 115D / 1902–07

Size.— 7⅛ in. by 3¾ in.

Extent.— 22 leaves ; 11 lines to a page ; 29 letters to a line.

Description.— Country paper, thin, rough and discoloured ; Devanāgarī Characters ; handwriting medium, clear and uniform ; borders ruled with single black line ; occasional marginal notes, corrections or additions ; red chalk used for important words or passages cited from *śrutis* ; several foll. worm-eaten ; forms part of Ms. containing 65 leaves of which the first 44 are devoted to the पद्यबंध of उपदेशसाहस्री.

Age.—Appears to be old.

Author.— Śaṁkarācārya.

Begins.— fol. 44ª

॥ श्रीपरमात्मने नमः ॥

ॐ अथ मोक्षसाधनोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्धानानामर्थिनामर्थसाधनाय ॥ etc.

Ends.— fol. 65ª

सर्वाण्युपनिषद्वाक्यानि विस्तरतः समीक्षितव्यानि समीक्षितव्यानि ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदभ (fol. 65[b])गवत्पादपूज्यशिष्यस्य शंकरभगवतः कृतिः सकलोपनिषत्सारउपदेशसाहस्री समाप्ता ॥

श्रीमद्वाराणसीक्षेत्रे विश्वेशचरणांतिके ॥

उपदेशस्यसाहस्री दत्तामय अद्वयानंदबोधस्वरूपचिदविलासलीलाविग्रहश्रामोदविलसित लिखत् ॥ श्री ॥

fol. 65[a]: (at the end ;— इति उपदेशसहस्र्यां गद्यबंधः समाप्तः ॥

[Then begins a fragment of another work.]

उपदेशसहस्री
(सव्याख्या-पदयोजनिका)

Upadeśasahasrī
with (comm.—Padayojanikā)

No. 177

142
Viśrāma I

Size.— 11½ in. by 5 in.

Extent.— 162—44 = 118 leaves; 11 lines to a page; 45 letters to a line.

Description.— Country paper, dark, grey, rough and thick , Devanāgarī characters ; handwriting medium, uniform and beautiful ; many leaves greatly discoloured ; foll. missing :—3-27, 46, 50, 71, 72, 80, 81, 91, 97, 98, 101, 102, 139-143, 150, 157, 158 ; the text is imbedded in the commentary ; very rarely marginal corrections and additions are seen ; a fairly careful copy.

Age.— Old.

Author.— Text.— Śaṁkarācārya.
Comm.— Rāmatīrth.

Begins.— fol. 1^{b} Text.—

चैतन्यं सर्वगं सर्वं etc.

Comm.

॥ श्रीगणेशाय नमः ॥

यत्राध्यस्तमिदं सर्वं मेयमात्राद्यविद्यया ॥ etc.

Ends.— fol. 162^{a} Text.—

तयाऽमृतं ज्ञानमिदं हि यैः पुरा
नमो गुरुभ्यो परमीक्षितं च यैः ॥ ॥ २८ ॥

इति श्रीमत्परम . . . . श्रीगोविंद . . .शिष्यस्य श्री शंकर-भगवतः सकलवेदोपनिषत्सारोपदेशसहस्री समाप्ता ॥

Comm.—

इति श्री-(fol 162^{b}) शंकराचार्यकृतोपदेशसहस्र्याः पदयोजनिका नाम टीका कृष्णतीर्थशिष्यरामतीर्थविरचिता समाप्ता ॥

सहस्रोपदेशेन हार्दं तमो यः . . . .

. . . , ...

रसरामसुनींदुवत्सरे सितपक्षासिभमार्गशीर्ष्यके ।
लिखिता मदनात्मजेन चेयं मगछं शंकरकल्पितोपदेशः ॥ श्रीरामः ॥

In three columns :—

प्रथमं व्याससूत्राणि तदुपरि शारीरिकं भाष्यं तदुपरि वाचस्पतिः तदुपरि कल्पतरुः तदुपरि परिमलः तदुपरि पंचपादिकाविवरणं चतुःसूत्रे त्वत्त्व दीयते ॥ ॥

सुरेश्वरवार्त्तिकं आनंदगिरीयं इदं उत्तरमीमांसाया अथातो ब्रह्मजिज्ञासेत्यादेर्व्याख्यारूपं प्रस्थानत्रयं सदीया एते ग्रंथाः ॥ ॥

उक्तं च शिवर(ह)स्ये ।

दक्षभागे स्थितो ब्रह्मा वामभागे जनार्दन ॥
मध्यमक्षेत्रे स्थितः साक्षात् शिवः (स)र्वार्थसिद्धिदः ॥ १ ॥

पूर्वभागेऽमृतं न्यस्तं देवैर्ब्रह्मादिभिः पुरा ॥
पृष्टभागे स्थिता यक्षाः सद्रत्नानां निबंधकाः ॥ २ ॥

इन्द्रादयो लोकपाला पूता येन्ने परिकीर्तिताः ॥
ततो वै पूर्वभागेन पूजयेन्निरिजापतिं ॥ ३ ॥

पत्रं वा यदि वा पुष्पं फलं नष्टमधोमुखं ॥
एतद्विवचनं देवि बिल्वपत्रेषु नोचितं ॥

उपदेशसहस्री (गद्यबंध) (सव्याख्या)

Upadeśasahasrī (Gadyabandha) (with Commentary)

No. 178 — 753 / 1891-95

Size.— *13 in. by 8¼ in.*

Extent.— 14 leaves ; 22 lines to a page ; 20 letters to a line.

Description.— Modern paper ; Devanāgarī characters ; handwriting bold, uniform and clear ; borders ruled with single pencil lines ; the paper is modern (foolscap size) bearing watermarks : "Shaik Ahmed Shaik Dawood, 1886" and "Schrouder Smidt & Co., Culcutta, 3" with a shield design below which the words "English Make" are visible. Ms. incomplete.

Age.— Modern.

Author.— Text.—Śaṁkarācārya.
Comm.—Rāmatīrtha.

Begins.— fol. 1ª Text.—

॥ उपदेशसहस्न्याः गद्यबंधः ॥

अथ मोक्षसाधनज्ञानोपदेशविधिं व्याख्यास्यामो etc.

Comm.—

॥ श्रीगणेशाय नमः ॥ समस्तमहाविद्यासंप्रदायप्रवर्तकाचार्येभ्यो नमः ॥ ओं नमो भगवते सर्वात्मने वासुदेवाय नमः ॥

प्रणम्य रामाभिधमात्मधीपदं etc.

End.— fol. 14[b]

अभेदविज्ञानादेवेति ॥ पुरुष सौम्येति हस्तं गृहीतमानयन्तीति खण्डे इममर्थं दर्शयतीत्यर्थः ॥ १८ ॥

उपदेशसहस्री
(गद्यबंध) (सटीका)

Upadeśasahasrī
(Prose) (with Commentary)

No. 179 $\frac{259}{1892\text{-}95}$

Size. 12½ in. by 5⅜ in.

Extent.— 41 leaves; 14 lines to a page; 40 letters to a line.

Description.— Country paper, thin, rough and grey; Devanāgarī Characters; handwriting medium size, beautiful and uniform; borders ruled with double black lines; yellow pigment occasionally used for corrections, and sometimes greyish-white also; marginal additions and notes; foll. are all musty, worn out, with frayed ends, and at places discoloured; from the middle of the work the text is written in the centre with comm. above and below it.

Age.— Appears to be quite old.

Author.— Text.— Śaṁkarācārya.
Comm.— Rāmatīrtha.

Begins.— fol. 1[b] Text—

ॐ नमः श्रीगणेशाय नमः ॥

अथ मोक्षसाधनज्ञानोपदेशविधिं व्याख्यास्यामो etc.

Comm.—

॥ श्रीगणेशाय नमः ॥ समस्तब्रह्मविद्यासंप्रदायप्रवर्तकेभ्यो नमः ॥ ॐ नमो भगवते सर्वात्मने वासुदेवाय ॥

प्रणम्य रामाभिधमात्मधीपदं etc.

Ends.—fol. 41^b Text.—

. . समीक्षितव्यानि समीक्षितव्यानि ॥ ७३ ॥

इति श्रीमच्छंकरभगवत्पादकृतौ उपदेशसहस्र्यां गद्यबधः समाप्तः ॥

Comm —

उपदेशसहस्र्यास्सद्गद्यबधो यथामति ॥ व्याख्यातो रामतीर्थेन भक्त्या स्वज्ञानसिद्धये ॥ समाप्तः ॥

•

उपदेशसाहस्री (सटीका : पदयोजनिका)

Upadeśasāhasrī with (Comm. Padayojanikā)

No. 180 — 309 / 1899-1915

Size.— 11 in. by 5¼ in.

Extent.— 122 leaves, 15 lines to a page ; 45 letters to a line.

Description.— Country paper, thin, rough and grey , Devanāgarī characters , handwriting medium, uniform and legible ; red chalk marks verse-numbers, colophons and verse-citations in the comm., text in the centre, comm. above and below it Alternate foll. are coloured with yellow pigment which is also used for corrections , several foll. worm-eaten.

Age.— Samvat 1855

Author.— Text —Śamkarācārya.
Comm.— Rāmatīrtha

Begins.—fol. 1^b Text—

॥ श्रीरामचंद्राय नमः ॥

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयं etc.

Comm.—

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः
यत्राध्यस्तमिदं सर्वं मेयमात्राद्यविद्यया ॥ etc.

Ends.—fol. 122^a. Text—

नमो गुरुभ्यः परमीक्षितं च यैः ॥

इति श्रीमत्परम . . . गोविंद . . . शिष्यस्य श्रीशंकरभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसाहस्री समाप्ता ॥ ॥ छ ॥

Comm.—

युक्तमग्रगुरुसुखपूजनमित्यर्थः ॥ २८ ॥

इति श्रीमच्छंकराचार्यकृतोपदेशसाहस्र्यां पदयोजनिका नाम टीका कृष्णतीर्थशिष्यरामतीर्थविरचितायां सहस्रोपदेशि समाप्ता ॥ छ ॥

उपदेशसहस्रीयं विवृत्ता हि महात्मभिः ॥
श्रद्धावेशान्मयाप्यस्याःपदयोजनिका कृता ॥

. . . . . .

. . . . तुष्यत्वखिलांतरात्मा ॥ ३ ॥

शुभमस्तु ॥ श्रीरस्तु ॥ छ ॥ श्रीसंवत् १८५५ वैशाखमासे कृष्णपक्षे तृतीयायां भौमवारे समाप्ता अवंतिकामध्ये ॥ ॥ छ ॥ ॥

उपदेशसहस्रीगद्यबंधटीका Upadeśasahasrīgadya-bandhaṭīkā

No. 181 $\frac{115\ B}{1902\text{–}07}$

Size.— 7¾ in. by 3½ in.

Extent.— 64 leaves; 11 lines to a page; 29 letters to a line.

Description — Country paper, thin, rough and discoloured, Devanāgarī characters, handwriting medium, clear and uniform borders ruled at places with single black line, red chalk used for important words in the end

Age —Appears to be old

Author — Rāmatīrtha

Begins — fol 1ª

॥ श्रीगणेशाय नम ॥ समस्तब्रह्मविद्यासंप्रदायप्रवर्त्तकाचार्येभ्यो नम ॥

प्रणम्य रामाभिधमात्मबोधद जगत्प्रसूतिस्थितिसंयमायत ॥
तदात्मकांडंकरपूर्वकान्गुरून्गद्यपद्यार्थविभाग उच्यते ॥ १ ॥

इह भगवत्पादाभिधो भगवान् भाष्यकार सर्वोपनिषदर्थसारग्राहिकामुप देशसहस्रीं गद्यपद्यविभागप्रथरचनया प्रकटीकुर्वन्नादौ गद्यबंधमारभमाण प्रारीप्सितपरिसमाप्तिप्रचयगमनादिप्रयोजन शिष्टाचारविशेषपरिप्राप्त मगलमाचरत्यथेति ॥

ॐकारश्चाथशब्दश्चद्वावेतौ ब्रह्मण पुरा ।

कठ भित्वा विनिर्यातौ तस्मांगलिकावुभाविति स्मृतावथ शब्दस्य मागलिकत्वावगमात् ॥ etc

Ends — fol 63ᵇ

ब्रह्मविद्याप्रतिपादकानि सर्वाणि वेदांतवाक्यानि विस्तरशो बहुशाखोप संहारेण पुन पुनरालोचयितव्यानीत्य (fol 46ª) ं ॥ द्विरुक्तिर्गद्यबंध समाप्तिद्योतनार्था ॥

उपदेशसहस्र्या सद्गद्यबंधो यथामति ॥
व्याख्यातो रामतीर्थेन अन्यया स्वज्ञानसिद्धये ॥

इति श्रीउपदेशसहस्रीगद्यबंधटीका समाप्ता ॥ ॥

उपदेशसाहस्री (गद्यबंध) (सटीका)

Upadeśasāhasrī (Gadya-bandha) (with Commentary)

No. 182

116 / 1902-07

Size.— 10⅝ in. by 6 in.

Extent.— 28 leaves ; 18 lines to a page ; 52 letters to a line.

Description.— Country paper, thin, smooth and grey ; *Devanāgarī* characters ; handwriting small, clear and uniform ; borders ruled with double red lines ; red chalk used to mark important words in text and comm.; yellow pigment occasionally used for corrections ; text in the centre, comm. above and below it ; occasional marginal addition : fol. 1 forms the second leaf of a folded fol., and the preceding fol. contains in a different form a table of astrological (and astronomical) data ; the paper also is different, so perhaps it was pasted on to this Ms. to strengthen fol. 1.

Age.— Fairly old.

Author.— Text.—Śaṁkarācārya.

Comm.— Rāmatīrtha.

Begins.— fol. 1b Text.—

श्रीगणेशाय नमः

ॐ अथ मोक्षसाधनज्ञानोपदेशविधिं व्याख्यास्यामो . . . etc.

Comm.—

श्रीगणेशाय नमः ।

ॐ प्रणम्य रामाभिधमात्मधीपदं etc.

Ends.— fol. 28a

सर्वाण्युपनिषद्व्याख्यानि समीक्षितव्यानि समीक्षितव्यानि ॥

इति श्रीमच्छंकरभगवत्पादकृता उपदेशसाहस्र्यां गद्यबंधः समाप्तिमगात् ॥

Comm.—

पुनरालोचनीयानीत्यर्थ ॥ द्विरुक्तिर्गद्यबंधसमाप्तिद्योतनार्था ॥

उपदेशसहस्त्र्या सद्गद्यबंधो यथामति ॥
व्याख्यातो रामतीर्थेन भक्त्या स्वज्ञानसिद्धये ॥

उपदेशसहस्त्री (गद्यबंध) (सटीका) — Upadeśasahasrī (Gadyabandha) (with Commentary)

No 183 — $\frac{600}{1884\ 87}$

Size — 11¼ in by 5¾ in

Extent — 41 leaves , 13 lines to a page , 42 letters to a line

Description —Country paper, rough, thick and grey Devanāgarī characters , handwriting medium, clear and uniform , borders ruled with two double spaced lines in black , fol 1ª has a rectangular design besides yellow pigment profusely used for corrections text in the centre with comm above and below it the work is written both in prose and verse and this Ms presents the prose part

Age — Samvat 1770

Author — Text Śamkarācārya
Comm.—Rāmatīrtha

Begins.— fol 1ª Comm

श्रीगणेशाय नम समस्तब्रह्मविद्यासंप्रदायप्रवर्त्तकाचार्येभ्यो नमः॥
ॐ नमो भगवते सर्वात्मने वासुदेवाय नम ॥

प्रणम्य रामा (fol 2ª)भिधमात्मधीपद
जगत्प्रसूतिस्थितिलयमायन

तदात्मकाञ्छंकरपूर्वकान् गुरून्
मयोपदेशार्थविभाग उच्यते ॥ १ ॥

इह भगवत्पादाभिधो भगवान् भाष्यकारः सर्वोपनिषदर्थ-सारसंग्राहिकामुपदेशसहस्रीं गद्यपद्यविभागग्रंथरचनया प्रकटीकुर्वन्नादौ गद्यैवमारभमाणः प्रारिप्सितपरिसमाप्तिप्रचयगमनादिप्रयोजनं शिष्टाचारविशेषपरिप्राप्तं मंगलमाचरति अथेति etc.

Text.— fol. 2ᵇ

अथ मोक्षसाधनज्ञानोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्धानानामर्थिनामर्थायतदिदं मोक्षसाधनसाध्यानित्यात्मवर्गमाद्विरक्ताय त्यक्तपुत्रवित्तलोकैषणाय प्रतिपन्नपरमहंसपरिव्राज्याय शमदमदयादियुक्ताय शास्त्रप्रसिद्धशिष्यगुणसंपन्नाय शुचये ब्राह्मणाय विधिवदुपसन्नायशिष्याय जातिकर्मवृत्तविद्याभिजनैः परीक्षिताय ब्रूयात् पुनः पुनर्यावद्ग्रहणं दृढीभवति ॥ १ ॥ etc.

Ends.— fol. 41ᵃ Text.—

इति श्रीमच्छंकरभगवत्पादकृतौ उपदेशसहस्र्यां गद्यबंधः समाप्तः ॥

Comm.—

ब्रह्मविद्याप्रतिपादकानि सर्वाणि वेदांतवाक्यानि विस्तरशो बहुशालोचसंहारेण पुनः पुनरालोचनीयानीत्यर्थः ॥ द्विरुक्तिर्गद्यबंधसमाप्तिद्योतनार्थः ॥

उपदेशसहस्र्यामद्गद्यबंधो यथामति ।
व्याख्यातो रामतीर्थेन भक्त्या स्वज्ञानसिद्धये ॥
विक्रमेतेववहले तृतीयायां विधेर्दिने ।
उपदेशसहस्रीं तु अंवकः पूर्णतां व्यधात् ॥

इति श्रीमच्छंकरभगवत्पादकृतौ उपदेशसहस्र्यां गद्यः ॥ शुभमस्तु संवत् १७७० सावण शुः

References.—(1) Mss.— A- Aufrecht's Catalogus Catalogorum :— I, 149ᵃ ; II, 30ᵃ.

उपदेशसहस्री
(सटीका-पदयोजनिका)

Upadeśasahasrī
(with Commentary-Padayojanikā)

No. 184 601/1884-87

Size.— 11¼ in. by 5⅜ in.

Extent.— 139 leaves ; 12 lines to a page ; 41 letters to a line.

Description.— Country paper, thick, rough and grey ; Devanāgarī characters ; handwriting clear, medium and uniform ; borders ruled with double black lines ; occasional marginal notes and additions ; red chalk used to mark verse-numbers and colophons ; text in the centre with comm. above and below ; green pigment used for corrections ; Ms. divided into 19 प्रकरणs containing 673 *ślokas* ; the comm. is called पदयोजनिका.

Age.— Saṁvat 1770.

Author.— Text.— Śaṁkarācārya.
Comm.— Rāmatīrth (disciple of Kṛṣṇatīrtha).

Begins — Text.— fol. 2^b

ॐ चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयं ।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥ १ ॥ etc.

Comm.— fol. 1^b

श्रीगणेशाय नमः ॥

यत्राध्यस्तमिदं सर्वं मेयमात्राद्यविद्यया ॥
भाति नो भाति यज्ज्ञानात्तदस्मि ब्रह्म चित्सुखं ॥ १ ॥

तदेवं सर्वोपनिषदर्थसारसंग्रहं गद्यपद्यप्रबंधेन संक्षेपतो युक्त्योपदिश्य पुनरप्युक्तमेवार्थंज्ञात पद्यबंधप्रबंधेन सोपस्करविस्तरेणोपदेष्टुकामो भगवान् भाष्यकारः पद्यग्रंथारंभे ग्रंथप्रतिपाद्यपरदेवतानमस्काररूपं मंगलं etc.

Ends.— fol. 139^a Text.—

विमथ्य वेदोदधितः समुद्धृतं सुरैर्महाब्धेस्तु यथा महात्मभिः ॥
तथामृतं ज्ञानमिदं हि यैः पुरा नमो गुरुभ्यः परमीक्षितं च यैः ॥ १८ ॥

इति श्रीत्परमहंसपरिव्राजकाचार्य श्रीगोविंदभगवत्पादपूज्यशिष्यस्य श्री-शंकरभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसहस्री समाप्त ॥ ॥ श्रीरामाय नमः ॥

Comm.—

समस्तवेदार्थरहस्यगद्यपद्यप्रबंधार्थतयाऽवबोधः ।
कथं नु मादृक्प्रतिविंबित स्यादथापि भक्त्याहमिहास्मि ॥ २ ॥

हृदंतराविःकृतराममूर्तेस्तथा गुरूणां विपुलप्रसादात् ॥
यथा कथंचिद्रचितेन विष्णुरनेन तुष्यत्वखिलांतरात्मा ॥ ३ ॥

इति श्रीशंकराचार्यकृतोपदेशसहस्र्याः पदयोजनिका नाम टीका कृष्ण-तीर्थशिष्यरामतीर्थविरचिता समाप्ता ॥ ॥ शुभं भवतु ॥ हरिः ॐ तत्-सद्ब्रह्मार्पणमस्तु ॥

संवत १७७० मीती भादव सुदी पुर्नवाशी

The following correct analysis given on fol. 1ª

पत्रं		प्रकरणं	श्लोकाः
1–11	I	चैतन्य-प्र.	25
11–13	II	प्रतिषेध-प्र.	4
13–14	III	ईश्वर-प्र.	4
16	IV	अहंप्रत्यय-प्र.	6
18	V	मूत्राशंका-प्र.	5
20	VI	विशेषापोह-प्र.	6
21	VII	बुध्यारूढ-प्र.	6
23	VIII	चिति-प्र.	6
26	IX	सूक्ष्मता-प्र.	9
30	X	दृशि-प्र.	14
33	XI	ईक्षितृ-प्र.	16
37	XII	प्रकाश-प्र.	19
41	XIII	अचक्षु-प्र.	27
51	XIV	स्वप्नस्मृति-प्र.	50
62	XV	नान्यदन्य-प्र.	54
78	XVI	पार्थिव-प्र.	74
94	XVII	सम्यङ्मति-प्र.	89
131	XVIII	तत्त्वमसि-प्र.	231
139	XIX	मन.संवाद-प्र.	28
		Total	673

उपदेशसहस्री (सटीका)

Upadeśasahasrī (with Commentary)

No. 185 231/1882-83

Size.— 11 in. by 6½ in.

Extent.— 124 leaves ; 15 lines to a page ; 48 letters to a line.

Description.— Country paper, thick, smooth and slightly discoloured ; Devanāgarī characters ; handwriting medium, fair and legible ; text in centre, comm. above and below it ; *red chalk used for colophons, and at places for important* words, etc.; occasional marginal notes and additions; Ms. gives the verse part of the complete work ; foll. not numbered towards the end (from 86-123); also at the beginning in places.

Age.— Saṁvat 1842.

Author.— Text.— Śaṅkarācārya.

Comm.— Rāmatīrtha.

Begins.— Text. *fol.* 2b

॥ ॐ ॥ चैतन्यं सर्वगं सर्वं etc.

Comm.— fol. 1b

श्रीगणेशाय नमः ॥

यत्राध्यस्तमिदं सर्वं मेयमात्रादविद्यया ॥ etc.

Ends.— fol. 124a Text.—

तथाऽमृतं ज्ञानमिदं हि यैः पुरा नमो गुरुभ्यो परमीक्षितं च यैः ॥२८॥
इति श्रीमत्परम...श्रीगोविंद...शिष्यश्रीशंकर...कृतिः सकलवेदोपनिषत्सारोपदेशसहस्री समाप्ता ॥ शुभमस्तु ॥ संवत् १८४२ ॥

Comm.—

इति श्रीशंकराचार्यकृतोपदेशसहस्र्यां पद्ययोजनिका नाम टीका कृष्णतीर्थशिष्यरामतीर्थविरचिता समाप्ता ॥

सहस्रोपदेशेन हार्दं तमो यः स्वचिन्मात्रभासा निवार्या स्वभद्रं ॥
वृद्दाषात्मरूपं समस्तार्थदीपं गुरुं काशिराजं निजं तं नमामि ॥ १ ॥

रसरामसुनींदुवत्सरे सितमथासितमार्गशीर्षके ॥
लिखिता मदनात्मजेन चेयं भगवछंकरकल्पितोपदेशी ॥ २ ॥

लिपक हरिभक्तवल्लभदासवनमालीदास ज्ञाते चणिक सुरतना वासी
ठेक्यां रायु शहियेद परामध्ये शास्त्रीनी जोडे रहे छे ॥

References.— (1) Mss.— A- Aufrecht's Catalogus Catalogorum.— I, 67ª, 776ª ; II, 12ª, 191ª ; III, 15ª.

B-Descriptive Catalogues :—
Ind. Off. Cat. 2272–78.
Mad. Cat. IX, Nos. 4565–66.
Mitra, *Notices* iv, nos. 1474–75 ; also viii, no. 2848.

(2) Printed Editions :—
Text and Commentary edited by Kṛṣṇa Śāstrī, Navasare Bombay, Jagadīśvara Press, 1886.

उपदेशसहस्री (गद्यबंध) — Upadeśasahasrī (In prose)

(सटीका) — (with Commentary)

No. 185 — $\frac{232}{1882\text{–}83}$

Size.— 12½ in. by 7½ in.

Extent.— 46 leaves ; 15 lines to a page ; 45 letters to a line.

Description.— Country paper, thick and grey ; Devanāgarī characters ; handwriting bold, uniform and legible ; borders ruled with single black line ; red chalk used for marking important words, phrases or passages ; occasional use of white pigment for corrections ; marginal additions or corrections at some places ; text in the centre, comm. above and below it.

Age.— Fairly old.

Author.— Text.—Śaṅkarācārya.
Comm.—Rāmatīrtha.

Begins.— Text.— fol. 2ª

ॐ नमः परमात्मने ।

अथ मोक्षसाधनज्ञानोपदेशविधिं व्याख्यास्यामो...etc.

Comm.— fol. 1ᵇ

श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः ॥ समस्तब्रह्मविद्याप्रवर्त्त-
केभ्यो नमः ॥ ॐ नमो भगवते सर्वात्मने वासुदेवाय ॥

प्रणम्य रामाभिधमात्मधीपदं etc.

Ends.— fol. 46ª Text.—

उपनिषद्वाक्यानि समीक्षितव्यानि समीक्षितव्यानीति ॥ ७१ ॥

गद्यबंधः समाप्तः ॥

Comm.—

द्विरुक्तिर्गद्यबंधसमाप्तिद्योतनार्था ।

उपदेशसहस्र्याः स गद्यबंधो यथामति ।
व्याख्यातो रामतीर्थेन भक्त्या स्वज्ञानसिद्धये ॥

इति गद्यबंधटीका समाप्ता ॥

उपदेशसहस्री
(सटीका)

Upadeśasahasrī
(with Commentary)

No. 187

179
Viśrāma II

Size.— 13¼ in. by 5¼ in.

Extent.— 37 leaves ; 7 lines to a page ; 40 letters to a line.

Description.— Country paper, thick, brittle and grey; Devanāgarī characters; handwriting bold, large and uniform; borders ruled with double red lines; foll. missing: 1, 13–20, 35–38, 40–78: foll. 23 repeated twice; many leaves discoloured; text in the centre with comm. above and below it.

Age.— Appears to be very old.

Author.— Text.— Śaṅkarācārya.

Begins.— Comm.— fol. 2ª

एवं जाग्रत्प्रवृत्तिस्थितिसंहारनियामकत्वेन सन्मात्रतया ताटस्थ्येन लक्षितस्य स्वरूपलक्षणं वदन् सर्वविषयवेदनाश्रयतया सर्ववित्तमिति वैशेषिकादिमताशंकां वारयति चैतन्यमिति ॥ etc.

Text.— fol. 3ª

श्रीगणेशाय नमः ॥

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयं ।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥ १ ॥ etc.

Ends.— fol. 88ᵇ Text.—

इत्येवं सर्वदात्मानं विचारसर्व समाहितः ॥
विदित्वा मां स्वदेहस्थमृपिर्मुक्तो ध्रुवो भवेत् ॥ २५ ॥

Comm.—

तदेवमुक्तलक्षणमात्मतत्व शास्त्राचार्यप्रसादाच्छ्रयणममन (for–श्रवण-मनन) निधिध्यासननिष्ठाप्राप्तः सन् सदा मुमुक्षुरहं महास्मीत्यनुसंदध्यादिति मुमुक्षुं मोक्साहयति इत्येवमिति सर्वं पूर्वमुक्तं वेदनफलमाह विदित्वेति॥ ऋषिः सर्वदर्शी ॥ छ छ छ छ

उपदेशादिविषयवाद Upadeśādiviṣayavāda

No. 188 319/1891–95

Size.— 10⅜ in. by 4⅝ in.

Extent.— 21 leaves ; 10 lines to a page ; 32 letters to a line.

Description.— Country paper, thin, soft and grey ; Devanāgarī characters ; handwriting bold, clear and uniform ; borders ruled with double red lines ; punctuation-marks in red white pigment used for corrections ; many leaves discoloured.

Age.— Appears to be old.

Author.— Vallabhācārya dāsadāsa.

Begins.— fol. 1b.

॥ श्रीकृष्णाय नमः ॥

॥ यथाधिकारं शरणभक्तिमागो(र्गो)पदेशतः ॥
य उद्धीरसवान् तं वंदे श्रीवल्लभं प्रभु(भुं) ॥ १ ॥

ननु सर्वपदं त्रैवर्णिकभिन्नपरत्वेनात्र व्याख्यातव्यं ॥ etc.

Ends.— fol. 21a

आत्मनिवेदनवत्पुनरत्रासंग्रहाद्य । एतेनैवान्येपि भक्तिपंथानो व्याख्याता ज्ञेयाः शंकापंकांतरपरिहारश्च साक्षाद्भगवदुक्तिसलिलधाराभिरेव विभाव्य साधनीय इत्यलं विस्तरेण ॥ ॥ छ ॥

इति श्रीवल्लभाचार्यदासदासेन निर्मितः ॥ · उपदेशादि-विषयो वादोयं प्राप पूर्णतां ॥ १ ॥ ॥ छ ॥ ॥ श्रीः ॥

References.—(1) Mss.— A– Aufrecht's Catalogus Catalogorum.— III 15b.

उपदेशार्थविभाग Upadeśārthavibhāga

No. 189 203 / Viśrāma II

Size.— 11¼ in. by 5 in.

Extent.— 58–20 = 38 leaves ; 9 lines to a page ; 33 letters to a line.

Description.— Country paper, thick, grey and discoloured ; Devanāgarī characters ; handwriting bold, beautiful, uniform and clear ; foll. missing :— 2–6, 8–10, 16, 22–27, 29, 30, 32, 44, 45 ; red chalk marks text citations ; Ms. is a comm. on the गद्यबंध of उपदेशसहस्री, but does not contain original text commented on ; Ms. incomplete.

Age.— Fairly old.

Author.—Rāmatīrtha.

Begins.— fol. 1b

॥ श्रीगणेशाय नमः ॥ श्रीरामाय नमः ॥ समस्तमहाविद्यासंप्रदायप्रवर्त्तकाचार्येभ्यो नमः ॥ ॐ नमो भगवते सर्वात्मने वासुदेवाय ॥

प्रणम्य रामाभिधमात्मधीपदं जगत्प्रसूतिस्थितिसंयमायनं ॥
तदात्मकान् शंकरपूर्वकान् गुरून् मयोपदेशार्थविभाग उच्यते ॥ १ ॥
etc.

Ends.— fol. 58b.

तत्र प्रथममात्मानमनात्मभ्यो विविच्यानुसंदधीतेत्युपदिशंस्तद्विवेकप्रकारमाह शब्दस्पर्शेत्यादिना ॥ विषयत्वे हेतुः श्रोत्रादिमाह्यत्वादिति ॥ स्वात्मनिशब्दादिस्वरू-

एकचत्वारिंशत्-शिक्षापत्र Ekacatvāriṁśat-Sikṣāpatra

No. 190 $\frac{711}{1884-87}$

Size.— 9⅞ in. by 5⅞ in.

Extent.— 26 = (34–9) leaves; 11 lines to a page; 28 letters to a line.

Description.— Country paper thick, rough and worn out; Devanāgarī characters; handwriting bold, clear and uniform; first 8 foll. missing; borders ruled with double red lines; verse-endings and colophons indicated in red ink; most foll. badly preserved; occasional marginal additions or corrections; the foll. are in book form, bound in small forms, now rather loose.

Age.— Appears to be old.

Author.— Haridāsa.

Subject.— Vallabhamata.

Begins.— fol. 8ᵃ

. . . . दचलन्मकरकुंडलं ॥
नृत्यं तं नयनानंदं नितांतरतिसंप्रदं ॥ ११ ॥

नितंबिनीवृंदवर्त्तिरसानुभवलोलुपं ॥
विहरंतं विशेषेण रासलीलापरायणं ॥ १२ ॥ etc.

fol. 10ᵃ

कृत्वा विषयवैराग्यं परितोषं विधाय च ॥ ३
सदानंदं सदानंदफलप्राप्त्यै सदा भजेत् ॥ ३५ ॥

इति श्रीनवममिदं शिक्षापत्रं । श्रीकृष्णाय नमः ॥ ९ ॥

को वेद कीदृशः कृष्णाभिप्रायः स्वजने मतः ॥
स्वानंदसिद्धये राति निजार्त्तिदर्शनादिषु ॥ १ ॥ etc.

fol. 10ᵇ

इति श्रीहरिदासविरचितं दशमं शिक्षापत्रं ॥ १० ॥

fol. 20ª

इति श्रीमद्धरिरायविरचितं चतुर्विंशतितमं.........

fol. 21ª

इति श्रीहरिदासोदितं......etc.

fol. 24ᵇ

इति श्रीहरिदासोक्तं......etc.

Ends.— fol. 34ª

इति प्रशंसया चित्तं यथा तस्य स्थिरं भवेत् ॥
सुखरोपि समीचीनो मुख्यदोषविवर्जितः ॥ ३२ ॥

वैद्यकेन गृहेस्माकं विशेषपरितोषणात् ॥
भवत्संगात्कंदुकवत्पतितः पुनरुत्थितः ॥ ३३ ॥

विशेषः प्रेमजी पत्राद्बोध्यः ॥ १ ॥

इति श्रीहरिदासकृतं शिक्षापत्रं समाप्तं ॥ ४० ॥ श्री वल्लभो जयति ॥ ॥

लौकिकं सकलं कार्यं प्रभुसेवोपयोजनात् ॥
परं सर्वत्र पूर्वं हि प्रभुश्चितो न लौकिकं ॥ १ ॥

fol. 34ᵇ

तदीयानां स्वतश्चितां कुरुते पितृवद्धरिः ॥
पुनश्चितां प्रकुर्वाणा मूर्खा एव न संशयः ॥ ११ ॥

तस्मादाचार्यदासैस्तु मच्छिक्षायां सदा स्थितैः ॥
सेव्यः प्रभुस्ततो भद्रमखिलं भावि सर्वथा ॥ १२ ॥

॥ इति श्रीहरिदासविरचितं एकचत्वारिंशत्शिक्षापत्रं समाप्तं ॥ ॥ श्री-रस्तु ॥ ॥ लेखकपाठकयोः शुभं भवतु ॥ कल्याणमस्तु ॥ ॥

References.— (1) Mss.— A- Aufrecht's Catalogus Catalogorum.— II, 14ª, 182ᵇ.

ऐतरेयोपनिषत्-शांतिपाठ
(सप्तमाध्यायदीपिका-युत)

Aitareyopaniṣad-Sāntipāṭha
(with Dīpikā)

No. 191

9-H
1866-68

Size.— 13½ in. by 7 in.

Extent.— 1 leaf; 18 lines to a page; 54 letters to a line.

Description.— *Country paper; Devanāgarī characters; handwriting* good; for full description see Ms. No. 9-A of 1866-68; forms the concluding or seventh *adhyāya* of Aitareyopaniṣad with *Dīpikā* commentary, called Saptamādhyāyadīpikā.

Age.— Fairly old.

Begins.—fol. 33ᵃ : Text.—

वाङ्मे मनसि प्रतिष्ठिता मनो वाचि प्रतिष्ठितं आविरावीर्म एधि etc.

Comm.—

एवं षष्टेध्याये तत्वविद्यां परिसमाप्य सप्तमे शांतिकरो मंत्रः पठ्यते वाङ्मे मनसीत्यादिना...etc.

Ends.— fol. 33ᵃ Text.—

अवतु मां अवतु वक्तारमवतु वक्तारं ॥ इति एतरेयोपनिषत् ॥

Comm.—

विद्यासंप्रदायप्रवृत्तिप्रयुक्तः परितोषः फलं ॥ अनेन मंत्रपाठेन विद्योत्पत्तेः पुरा विद्याप्रतिबंधका विघ्नाः परिह्रियंते । विद्योत्पत्तेरूर्ध्वं असंभवनाविपरीत-भावनोत्पादका विघ्नाः परिह्रियंते अवतु वक्तारमित्यभ्यासोध्यायपरि-समाप्त्यर्थः ॥ द्वितीयारण्यकपरिसमाप्त्यर्थश्च ॥

इति सप्तमाध्यायदीपिका संपूर्णा ॥

ऐतिह्यतत्त्वराद्धान्त — Aitihyatattvarāddhānta

No. 192 — $\frac{703}{1884\text{–}87}$

Size.— $11\frac{3}{8}$ in. by $5\frac{5}{8}$ in.

Extent.— 35 leaves; 10 lines to a page; 32 letters to a line.

Description.— Thick country paper ; Devanāgarī characters ; handwriting large, bold and uniform ; borders ruled with double black lines ; yellow pigment used for deletion ; interlinear additions and corrections ; red chalk smeared over key passages sporadically.

Age.— Fairly old.

Author.— ? (Aufrecht II 14^b—by Nimbārka).

Begins.— fol 1^b

श्रीमते निंबादित्याय नमः ॥

नमः कृष्णाय हंसाय निंबार्काय निरुद्धतः ।
आचार्याय:चतुर्व्यूहपरंपराप्रवर्त्तिने ॥ १ ॥

संप्रदायविहीना ये मंत्रास्ते विफला मताः ।
अतः परंपरा सेव्या प्रयत्नेन मनीषिभिः ॥ २ ॥ etc.

Ends.— fol. 35^a.

ते भक्तिः दुर्गमजरं शरणं भजंतः
पादारविंदविभवानुभवाय कल्पाः ।
तिष्ठंति कृष्णचरणांबुजदुर्गनिष्ठा
रक्षंति भक्तिमुत पुत्रवदेव नित्यम् ॥ २२ ॥

ऐतिह्यतत्त्वराद्धांते निंबादित्यविनिर्मिते
श्रीभक्तिचरणसंवित्तौ द्वादशसंधिरार्जितः ॥२३ ॥

श्रीमते निंबादित्याय नमः ॥

References.— (I) Mss.—A– Aufrecht's Catalogus Catalogorum :—
II, 14^b (our Ms.) ; III, 17^a (Nimbārka school).

फंटकोद्धार Kaṇṭakoddhāra

No. 193 $\frac{754}{1891\text{–}95}$

Size.— $12\frac{1}{2}$ in. by $6\frac{1}{2}$ in.

Extent.— 60 leaves; 12 lines to a page; 42 letters to a line.

Description.—Country paper, thick, rough and grey; Devanāgarī characters; handwriting bold, beautiful and uniform; yellow pigment occasionally used for corrections; red ink used for beginning, end and verse-endings; the title is also कुतर्ककंटकोद्धार.

Age.— Saṁvat 1877.

Author.— Rāmanārāyaṇa (son of Rājā Sucetarāma).

Begins.— fol. 1^b

श्रीकृष्णाय नमो नमः ॥

ॐ श्रियं नारायणं व्यासं शंकरं शंकरं गिरां ॥
गणेशं च गुरून् विप्रान् वैष्णवांस्तद्वपुर्जगत् ॥ १ ॥

नत्वा वेदांतसिद्धांतकुसुमाराममंडनं ॥
कुतर्कं कंटकोद्धारं निर्ममे बुधमोददं ॥ २ ॥

श्रीमन्नारायणः परमकृपालुर्विविधतापोपतप्यमाननिखिलजनतापोपशमनाय नित्यसुखलाभाय च। व्यासरूपेण प्रादुर्भूतस्तद्यथेह कर्मजितो लोकः क्षीयते एवमेवात्र पुण्यजितो लोकः क्षीयते इत्यादि श्रुत्या जातस्य हि ध्रुवो मृत्युरिति स्मृतिसिद्धो यत्कृतं कं तदनित्यमिति यो न्यायस्तत्संभावितत्वेन सकलस्या क्रियाफलमात्रानित्यतां पश्यन् ॥ अथातो ब्रह्मजिज्ञासेति सूत्रेणोपनिषद्विचारं प्रतिजज्ञे, तस्यायमर्थः etc.

Ends.—fol. 60^b

वंदे श्रीरामसिंहाख्यान् बोधदान् बोधरूपिणः ॥
श्रीमत्सदासुखाख्यंश्च सच्छास्त्रार्थप्रदर्शकान् ॥ १ ॥

विष्णुमंत्रप्रदश्रीमद्धरिनाथपदांबुजे ॥
वंदे भवानिदासाह्वसावित्रीमंत्रदस्य च ॥ २ ॥

राजा सुचेतरामाख्यतातस्य च पदांबुजे ॥
वैष्णवानां द्विजानां च पादौ वंदेऽतिभक्तितः ॥ ३ ॥

श्रीमद्रामरमेशांघ्रिसरोरुहरजोयुतं ॥
नत्वा रजोपहं ग्रंथं भृत्यस्तत्पादुकेऽर्पये ॥ ४ ॥

इति श्रीमद्विष्णुसख्यापन्न श्रीरामनारायणविरचितं वेदांतसिद्धांतारामकंटकोद्धारं स(मा)प्तम् ॥ मिती वैशाष शुदि १३ ॥

संवत् । १८७७ । श्रीमथुराजी रामघाटमध्ये लि(पि)तं यमुनातटे ॥
श्रीकृष्णाय नमः ॥

रामनारायणकृतः कंटकोद्धार उत्तमः ॥
सोरटीविश्वनाथेन लेखितः द्वैतनाशनः ॥ १ ॥

॥ ग्रंथसंख्या १८०० ॥

References.— (1) Mss.—A-Aufrecht's Catalogus Catalogorum :— III 17ᵇ.

कथालक्षणभाववर्णन — Kathālakṣaṇabhāva-varṇana

No. 194 — 676 / 1882-83

Size.— 8⅞ in. by 3⅝ in.

Extent.— 10 leaves; 13 lines to a page; 42 letters to a line.

Description.— Country paper, musty, rough and discoloured; Devanāgarī characters; handwriting very small but uniform and legible; borders ruled with black lines; red chalk used for marking important words; Ms. in a commentary on Jayatīrtha's commentary on Ānandatīrtha's Kathālakṣaṇa.

Age.— Fairly old.

Author.— Vyāsatīrtha.

Begins — fol. 1ᵇ :

॥ श्रीवेदव्यासाय नमः ॥

ॐ ॥ परमशिष्टा जयतीर्थचरणा. श्रीमदानंदतीर्थभगवत्पादकृतकथालक्षणव्याख्यां कर्तुंकामा. प्रारिप्सितस्य ग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं आशीर्नमस्क्रियावस्तुनिर्देशो वापितन्मुखमित्यालंकारिकन्यायानुसारेण. .etc.

Ends.— fol. 10ᵃ

जयतीर्थमुनींद्राणां वचसां सारमुत्तमं ॥
जयतीर्थाः शारदा वा विदुर्नान्ये तु केचन ॥ ५ ॥
तथापि कृपया तेषां मद्गुरूणां कृपाबलात् ॥
जयतीर्थमुनींद्राणां ज्ञातार्थोत्र प्रकाशितः ॥ ६ ॥ ॥ छ ॥

इति कथालक्षणभाववर्णनं समाप्त ॥ छ ॥ छ ॥ श्रीकृष्णार्पणमस्तु ॥

References — (1) Mss —A-Aufrecht's Catalogus Catalogorum — I 78ᵇ

कथालक्षण (सविवरण) — Kathālakṣana (*Sa-vivarana*)

No. 195 — 228 / 1884–86

Size — 10 in by 4½ in.

